स नरो बधिरो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
नाम्नि संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्भवेत् कुणपोपमम् ॥
यस्मिन् स्मृते द्विजश्रेष्ठ ! मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ।
विप्रेन्द्र ! प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्म्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्म्माया दुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
कियदाराधने पुंसां श्रिष्यते हरिमेधसः ।
भक्त्यैवाराध्यते विष्णुर्नान्यं तत्रोपकारकम् ॥
न दानैर्व्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्व्वा समागमः ॥
पत्रेषु पुष्पेषु फलेषु सत्सु
तोयेषु लभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्त्यै कथं नु क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥
अज्ञानिनः सुरवरं समधिक्षिपन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापः
कः संशयः परमभक्तिमतां जनानाम् ॥
शरणं तं प्रपन्ना ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥
भवोद्भवक्लेशशताहतस्तथा
परिभ्रमन्निन्द्रियबन्धकैः पथैः ।
नियम्यतां माधव ! मे मनोहय-
स्त्वदङ्घ्रिशङ्कौ दृढभक्तिबन्धने ॥
विष्णुरेव परं ब्रह्म त्रिभेद इह पठ्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिपसुमतिरस्यमात्मनोऽन्तः
कथयति चारुतयैवमालपते ॥"
इति गारुड़े भगवद्भक्तिः २३१ अध्यायः ॥*॥
तस्य नमस्कारादिकं तत्रैव २३२ । २३३ । २३४
अध्यायेषु द्रष्टव्यम् ॥ * ॥ तस्य द्वादशमासकृत्यं
यथा—
"मासकृत्यं प्रवक्ष्यामि विष्णोः प्रीतिकरं परम् ।
ज्यैष्ठे तु स्नापनं कुर्य्यात् श्रीविष्णोः स्नानवासरे ॥
दैनन्दिनन्तु दुरितं पञ्चमासाहवर्षजम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ।
कोटिकोटिसहस्राणि ह्युपपापानि यानि च ॥
सर्व्वाण्यपि प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
अभिषिञ्चेच्च तन्मूर्द्ध्नि तदेतत् कलसोदकम् ॥
पुरुषसूक्तेन मन्त्रेण पावमानी ऋचा तथा ।
नारिकेलोदकेनाथ तथा तालफलाम्बुना ॥
रत्नोदकेन मन्त्रेन तथा पुष्पोदकेन च ।
पञ्चोपचारैराराध्य यथाविभवविस्तरैः ॥
घं घण्टायै नम इति घण्टावाद्यं निवेदयेत् ॥
पादे तस्य महाध्वानं ध्वस्तपातकपञ्चके ।
पाहि मां पापिनं घोरं संसारार्णवपातितम् ॥
य एवं कुरुते विद्वान् ब्राह्मणः श्रोत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ॥ १ ॥
आषाढ़शुक्लैकादश्यां कुर्य्यात् स्वापमहोत्सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणा-
विधिम् ॥ २ ॥ ३ ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् । ४ ।
प्रसुप्तस्य परिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानञ्च हरेः कुर्य्यादन्यथा विष्णुद्रोहकृत् ।
शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ॥५॥
कार्त्तिके मासि यत् कृत्यं शृणु देवि वरानने ! ।
सप्तवर्त्याः प्रमाणेन दीपः स्याच्चतुरङ्गुलः ॥
पक्षान्ते च प्रकर्त्तव्या दीपमालावलिः शुभा ॥६॥
मार्गशीर्षे स्थिते पक्षे षष्ठ्याञ्च सितवस्त्रकैः ।
पूजयेज्जगदीशञ्च तूलवस्त्रैर्विशेषतः ॥ ७ ॥
पौषे पुष्याभिषेकञ्च वर्ज्जयेच्चन्दनं यथा ॥८॥
संक्रान्त्यां माघमासे च साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो ! ।
त्वन्मायालीनतां प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूराक्ततिद्रव्याणि घृताक्तानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अभ्यर्च्य भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भक्तितः ।
विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेत् ध्रुवम् ॥
पञ्चम्यां शुक्लपक्षे तु स्नापयित्वा च केशवम् ।
पूजयेद्भगवद्भक्त्या चूतपल्लवसम्मितैः ॥ ९ ॥
फल्गुचूर्णैश्च विविधैर्व्वासितैः पटवासितैः ।
काननं रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
द्राक्षेक्षुरम्भाजम्बीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्री च वंशतालहरीतकी ॥
अन्यैश्च वृक्षषण्डैश्च सर्व्वर्त्तुकुसुमाचितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्व्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्द्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ ।
पूजयेद्विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्व्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राक्षारयोगाच्च रक्तैरम्यैर्म्मनोहरैः ॥
अन्यैर्व्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ॥
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्र्यहाणि स्युर्दोलोत्सवो विधीयते ।
दक्षिणाभिमुखं कृष्णं दोलयानं सकृन्नराः ॥
दृष्ट्वापराधनिचयैर्म्मुक्तास्तु नात्र संशयः ॥ १० ॥
निःक्षिप्य जलमात्रे तु मासि माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा मृण्मयेऽपि वा ॥
तोयस्थं योऽर्च्चयेद्देवं शालग्रामसमुद्भवम् ।
प्रत्यहं मां महाभागे तस्य पुण्यं न गण्यते ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कर्त्तव्यञ्च तदर्पणम् ॥११॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा गृहस्तुजे ॥
सुगन्धचन्दनेनाङ्गं सुपुष्टाङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः कृष्णाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुष्ठं कुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि अङ्गानि च विलेपयेत् ॥
घृष्टञ्च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमच्युते ॥
तस्मिन् काले कृष्णभक्त्या ये प्रपश्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमिश्रितैस्तोयैः स्नापयित्वा जगद्-
गुरुम् ।
अथवा पुष्पमध्यं च स्थापयेज्जगदीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तदशेषतः ॥
नारिकेलं फलं नीरं कोषश्चोवृत्य दापयेत् ।
कण्टाफलञ्च पनसं कोषमुवृत्य दीयते ॥
यथा पचेत्तथा दद्यादुयथाशक्तिनियोगतः ।
दध्ना विमिश्रितञ्चान्नं घृतेनाप्लुत्य दापयेत् ॥
पाचितं पिष्टकं धातुरष्टादश घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं शुद्धञ्च दापयेत् ॥
यद्यदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रत्तादीत्रादददीत कथञ्चन ॥
त्यक्तव्यं विष्णुमुद्दिश्य तद्भक्तेभ्यो विशेषतः ।
इति ते कथितं किञ्चित् समासेन महेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥१२॥
श्रीकृष्णरूपगुणवर्णनशास्त्रवर्गे
बोधाधिकार इह चेदलमन्यपारैः ।
तत्प्रेमभावबलभक्तिविलासनाम-
हासेषु चेद्यदि रतिः किमु कामिनीभिः ॥
तच्चेतसा विभजतां व्रजबालकेन्द्र
वृन्दावनं क्षितितलं यमुनाजलञ्च ।
तल्लोकनाथपदपङ्कजधूलिभिश्चे-
क्षिप्तं वपुः किल वृथागुरुचन्दनाद्यैः ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥
हरिः, त्रि, (हरति नेत्रदुःखमिति । हृ + इन् ।)
पिङ्गलवर्णः । हरिद्वर्णः । इति मेदिनी ॥ (यथ
रघुः ।३। ४३ ।
"शतैस्तमक्ष्णामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः